# E-Text

पत्रस्य नाम : लघुशब्देन्दुशेखरः (सन्धिपञ्चकम्)

पत्रसंख्या : V

पाठ्यांशनाम : स्थानिवदादेशोऽनल्विधौ - 3

पाठ्यांशसंख्या : 6

पाठ्यांशस्य मुख्याः अंशाः :

1) अतिदिश्यमानधर्मविरुद्धस्वाश्रयकार्याभावः।
2) अशास्त्रीयस्यापि धर्मस्यातिदेशः।
3) अनल्विधावित्यत्र विधिग्रहणप्रयोजनम्।
4) सामान्यातिदेशे विशेषानतिदेशः।

विषयसूची


1.0 : अतिदिश्यमानधर्मविरुद्धस्वाश्रयकार्याभावः

2.0 : अशास्त्रीयस्यापि धर्मस्यातिदेशः

3.0 : अनल्विधावित्यत्र विधिग्रहणप्रयोजनम्

4.0 : सामान्यातिदेशे विशेषानतिदेशः


e-पाठशाला ePathshala A Gateway to all Post Graduate Courses

## 1.0 अतिदिश्यमानधर्मविरुद्धस्वाश्रयकार्याभावः

**शेखरे - न च तण्डुलान् इत्यादौ स्थानिवद्भावेन प्रत्ययान्तत्वेपि स्वतः प्रत्ययान्तभिन्नत्वात् प्रातिपदिकत्वापत्तिरिति वाच्यम्। अतिदेशस्वभावेन अतिदिश्यमानधर्मविरुद्धस्वाश्रय- कार्याभावात्।**

तण्डुल शस् इति स्थिते "प्रथमयोः पूर्वसवर्णः" इति सूत्रेण पूर्वसवर्णदीर्घैकादेशे तण्डुलास् इति जाते एकादेशस्य परादिवद्भावेन शस्त्वात् सुप्तिङन्तं पदमिति पदसंज्ञा। "तस्माच्छसो नः पुंसि" इति सूत्रेण सकारस्य नकारादेशे तण्डुलान् इति जाते आस्-आन् इत्यनयोः आनुमानिकस्थान्यादेशभावेन आन् इत्यस्य स्थानिवत्त्वात् शस्त्वम्। ततश्च तण्डुलान् इत्यस्य शसन्तत्वेन पदसंज्ञा। इदानीम् "अर्थवदधातुरप्रत्ययः प्रातिपदिकमति" सूत्रेण प्रातिपदिकसंज्ञापि प्राप्नोति। स्थानिवद्भावेन प्रत्ययान्तत्वात् अप्रत्यय इति यद्यपि प्रातिपदिकसंज्ञाप्रतिषेधोऽस्ति तथापि तण्डुलान् इत्यस्य स्वतः यत् प्रत्ययान्तभिन्नत्वं तदाश्रित्य प्रातिपदिकसंज्ञा आपद्यते। ततश्च "नलोपः प्रातिपदिकान्तस्य" इति सूत्रेण नलोपः स्यात् - इत्याक्षेपः।

**समाधानम्** - अतिदिश्यमानधर्मविपरीतः स्वाश्रयो यो धर्मः तदाश्रयकार्यं न भवति। प्रकृते अतिदिश्यमानधर्मः प्रत्ययान्तत्वम्, स्वाश्रयधर्मः प्रत्ययान्तभिन्नत्वम्, अनयोः इतरविपरीतत्वं स्पष्टम्। तत्र कतरं धर्ममाश्रित्य शास्त्रं प्रवर्तनीयम् इति प्रश्ने अतिदिष्टधर्ममाश्रित्येत्येव युक्तम्। स्वाश्रयधर्मविपरीतस्य धर्मस्यातिदेशादेव प्राबल्यसिद्धेः। तथा च स्वाश्रयं प्रत्ययान्तभिन्नत्वमाश्रित्य प्रातिपदिकसंज्ञा नैव भविष्यति।

**शेखरे - अत एव जहीत्यादौ जादेशस्यासिद्धत्वे स्वाश्रयो हेर्लुक् न। सिद्धत्वासिद्धत्वयोः विरोधात्। असिद्धवत्सूत्रं तु शाधीत्यादौ स्थानिप्रयुक्तधि-भावसम्पादनेन चरितार्थम्।**

हनधातोः लोटि मध्यमपुरुषैकवचने सिपि "सेर्ह्यपिच्च" इति हिभावे "हन्तेर्जः" इति हनो जभावे जहि इति रूपमिष्टम्। तत्र जभावे कृते "अतो हेः" इति हेः लुक् प्राप्नोति। परन्तु "अतो हेः" इति सूत्रं, "हन्तेर्जः" इति सूत्रञ्च असिद्धवदत्राभात् इत्यधिकारे विद्यते। तथा च हिलुकि कर्तव्ये जभावस्यासिद्धत्वेन अदन्ताङ्गत्वाभावात् लुक् न भविष्यति। तत्र हनो जादेशे कृते स्वाश्रयं सिद्धत्वमाश्रित्य हिलुक्करणं वा अतिदिष्टम् असिद्धत्वमाश्रित्य तदकरणं वा युक्तमिति चेत् अतिदिष्टधर्माश्रितं तदकरणमेव युक्तम्। ननु अतिदिश्यमानधर्मविपरीतस्वनिष्ठधर्माश्रयकार्यकरणे सति अतिदेशस्यैव वैयर्थ्यप्रसङ्गः, अतः अतिदेशसामर्थ्यात् अतिदिश्यमानधर्मविरुद्ध-स्वाश्रयकार्याभावः इति कथ्यताम्, अतिदेशस्वभावादिति हेतुकथनं न सम्यक् - इत्याक्षेपे आह - असिद्धवत्सूत्रं तु इत्यादि। अतिदेशो न व्यर्थः, शास् हि इत्यादौ "शा हौ" इत्यादिना शाभावादौ कृते "हुझल्भ्यो हेर्धिः" इत्यादिना धिभावादिसिद्धये अतिदेशस्य सार्थक्यात्। तस्मात् अतिदेशस्वभाव इत्येव हेतुः उचितः।

**शेखरे - न च अप्रत्यय इत्यस्य पर्युदासत्वे शास्त्रीयकार्याभावात् स्थानिवत्त्वं दुर्लभम् इति वाच्यम्। वेः स्कन्देरनिष्ठायाम् इति षत्वविधायके तिङन्तेषु षत्वाभावाय आवश्यकेन न्याय्येन च अनिष्ठायामिति पर्युदासेन वृत्त्यादिसम्मतेन पर्युदासलभ्याशास्त्रीयेऽपि शास्त्रतात्पर्यविषये शास्त्रीयवदतिदेशबोधनात्। विस्कन्न इत्यादौ हि निष्ठानत्वस्य नित्यतया स्थानिवत्त्वेनैव निष्ठात्वस्य वक्तव्यत्वात्।**

प्रत्यासत्त्या शास्त्रीयकार्ये एव स्थानिवद्भावः, तेन नायकसिद्धिः - इत्युक्तं प्राक्। तण्डुलान् इत्यत्र स्थानिवद्भावेन प्रत्ययान्तत्वात् अप्रत्यय इति प्रातिपदिकसंज्ञाप्रतिषेधः सिध्यतीति चोक्तम्।

**अत्र प्रश्नः** - "अर्थवदधातुरप्रत्ययः प्रातिपदिकमि"ति सूत्रे अप्रत्यय इति पर्युदासः। तत्र - (प्रत्ययान्तभिन्नम् अर्थवत् शब्दस्वरूपं प्रातिपदिकं स्यात्) इति विधीयते, न तु (प्रत्ययान्तं शब्दस्वरूपं प्रातिपदिकं न स्यात्) इति निषेधः क्रियते। तथा च, निषेधस्य पर्यवसितत्वेपि, प्रत्ययान्तस्य प्रातिपदिकसंज्ञाप्रतिषेधो न शास्त्रीयं कार्यम्। तर्हि कथं स्थानिवद्भाव आश्रीयते -इति। समाधानम्- नायक इत्यत्र नै अक इति स्थिते आयादेशाभावार्थम् ऐकारे ईकारवत्त्वातिदेशः कर्तुं न शक्यते, आयादेशाभावस्य शास्त्रीयकार्यत्वाभावात्, शास्त्रतात्पर्यविषयत्वाभावाच्च। प्रत्ययान्ते प्रातिपदिकसंज्ञाभावस्य तु शास्त्रीयकार्यत्वाभावेऽपि शास्त्रतात्पर्यविषयत्वमस्त्येव। अशास्त्रीयं यत् कार्यं शास्त्रतात्पर्यविषय एव तत्र स्थानिवद्भावाश्रयणे प्रमाणमस्ति। तथाहि - वेः स्कन्देः इति वचनेन वेः परस्य स्कन्दधातोः सकारस्य षत्वं विहितम्। तेन च तिङन्तकृदन्तसाधारणतया षत्वे प्राप्ते अनिष्ठायाम् इति निषेध उक्तः। अत्र यदि निष्ठायां षत्वं न स्यादित्यर्थः तर्हि निष्ठाया अन्यत्र सर्वत्र षत्वं प्राप्नोति। परन्तु तिङन्तेषु षत्वं नेष्यते। अतः, अनिष्ठायामित्यत्र पर्युदास आश्रितो काशिकावृत्त्यादिग्रन्थेषु। निष्ठाभिन्ने निष्ठासदृशे प्रत्यये परे वेः परस्य स्कन्देः षत्वं स्यादिति तदानीमर्थः। तथा च तिङन्तेषु निष्ठासादृश्याभावात् कृदन्तेष्वेव षत्वं प्रवर्तते। यदि पर्युदासः तर्हि अप्रत्यय इत्यत्रेव निष्ठाभिन्ने परे षत्वं शास्त्रीयकार्यं, न तु निष्ठायां परतः षत्वनिषेधः शास्त्रीयकार्यम्। तथाच वि स्कन्द् क्त इति स्थिते अनिदितां हल उपधायाः क्ङिति इति सूत्रेण नलोपे विस्कद् त इति जाते "रदाभ्यां

निष्ठातो नः पूर्वस्य च दः” - इति सूत्रेण निष्ठातकारस्य धातुदकारस्य च नकारादेशे कृते, वि स्कन् न इत्यत्र षत्वनिषेधप्रवृत्त्यर्थं स्थानिवद्भावेन (न) इत्यत्र निष्ठात्वं सम्पादनीयम्। यदि शास्त्रतात्पर्यविषये अशास्त्रीये कार्ये स्थानिवत्त्वं न स्यात् तर्हि अनिष्ठायामिति व्यर्थं स्यात्। तस्मात् तदेव ज्ञापकं शास्त्रतात्पर्यविषये अशास्त्रीये पर्युदासलभ्ये कार्ये स्थानिवद्भावोस्तीत्यत्र।

**शेखरे- तस्य प्रसज्यप्रतिषेधत्वे तु लक्ष्यानुसारिव्याख्यानादेवोक्तार्थसिद्धिरिति बोध्यम्।**

अनिष्ठायामित्यत्र पर्युदास एवाश्रयणीय इति यद्यपि वृत्त्यादौ कथितं तथापि भाष्ये तथा विशेषो नोक्तः। अतः यदि प्रसज्यप्रतिषेधमाश्रित्य तिङन्तस्थलेपि षत्वमिष्टमेवेति स्वीक्रियते तर्हि पर्युदासलभ्ये अशास्त्रीये शास्त्रतात्पर्यविषये अतिदेशोऽस्तीत्ययमर्थः व्याख्यानगम्यः। तण्डुलानित्यादौ प्रातिपदिकसंज्ञाप्रतिषेधस्य लक्ष्यानुरोधेन इष्टत्वात्।

### 2.0 अशास्त्रीयस्यापि धर्मस्यातिदेशः

**शेखरे - केचित्तु, भाष्ये -तत्स्थानापन्ने तद्धर्मलाभस्य तत्कार्यस्य च लोकन्यायेनैव सिद्धेः- अयमतिदेशः स्वंरूपमित्येतच्छास्त्रसत्वात् हन्तेः कार्यं वधौ न स्याद् -इति - इत्युक्तम्। एवञ्च स्वंरूपमिति शास्त्राविषये तेन सिद्धिरिति सूचितम्। एवञ्चाशास्त्रीयस्यापि धर्मस्यातिदेशो भवत्येव।**

केचित्तु इत्यस्य दूरे विद्यमानेन आहुरित्यनेन सम्बन्धः। भाष्ये - स्थानिवत्सूत्रं किमर्थमारब्धम्, तत्स्थानापन्नस्तद्धर्मं लभते, यथा गुरोः शिष्यो याज्यकुलानि गत्वा अग्रासनादीनि लभते इति लोकन्यायेनैव आदेशः स्थानिधर्मान् लभते खलु, इति प्रश्ने कृते, स लोकन्यायः शास्त्रे नाश्रीयते, स्वं रूपं शब्दस्याशब्दसंज्ञा इति स्वरूपविधिना बाधितत्वात्। अतः स्थानिवत्सूत्रमावश्यकम् - इत्येवं कथितम्। तस्य लोकन्यायस्य

शास्त्रे सर्वथा अनाश्रयणमिति तु ततो न लभ्यते। यत्र स्वरूपविधिरस्ति तत्रैव लोकन्यायानायणम्। अतः तद्विषये स्थले लोकन्यायप्रवृत्त्या अशास्त्रीयस्यापि धर्मस्यातिदेशो भवतीति स्वीकर्तुं शक्यते। तथाच तण्डुलास् इत्यादौ आनुमानिके स्थानिनि विद्यमानः अप्रातिपदिकत्वरूपो धर्मः तण्डुलान् इत्यादौ आनुमानिके आदेशे अतिदेशः सम्भवति। अतिप्रसङ्गस्तु लक्ष्यानुसारेण क्वचित् न्यायानयणेन परिहरणीयः।

**शेखरे - न पदान्तसूत्रे ब्राह्मणकण्डूतिरित्युदाहरणाच्च क्वचित्तदनाश्रयणम्। तत्र हि कण्डूयतेः क्तिचि तत्राल्लोपे तस्य स्थानिवत्त्वात् उवङि यणि वा अनादिष्टादचः पूर्वत्वे स्थानिद्वारके गृह्यमाणे ऊठ् न स्याद् - इत्याहुः।**

लोकन्यायस्य क्वचिदनाश्रयणमित्युक्तम्। तत्र प्रमाणं - भाष्ये ब्राह्मणकण्डूतिरिति उदाहरणम्। तथाहि- नपदान्तसूत्रे यलोपे स्थानिवद्भावनिषेधस्य उदाहरणतया ब्राह्मणकण्डूतिरिति क्तिजन्तमुदाहृतम्। कण्डूञ्-धातोः कण्ड्वादिभ्यो यक् इति सूत्रेण यकि ततः "क्तिच्क्तौ च संज्ञायाम्" इति सूत्रेण क्तिचि कण्डूय ति इति स्थिते "अतो लोप" इत्यल्लोपे "लोपो व्योर्वलीति" सूत्रेण यकारलोपे च कण्डू ति इति जाते अल्लोपस्य स्थानिवत्त्वात् उवङ् यण् वा क्रियते। द्विविधा हि कण्ड्वादयो धातवः प्रातिपदिकानि च। तत्र धातुश्चेत् उवङ्, प्रातिपदिकञ्चेत् यण्। उवङि कण्डुव् ति इति जाते झलादिक्ङित्परकत्वात् "च्छ्वोः शूडनुनासिके च" इत्यनेन ऊठि सवर्णदीर्घे कण्डूतिः। यणि च कण्ड् व् ति इत्यत्र ऊठि कण्ड् ऊ ति - कण्डूतिः। अत्र यदि कण्डुव् इत्यस्मिन् कण्ड् व् इत्यस्मिन् वा कण्डूशब्दनिष्ठः स्थानिपूर्वत्वरूपः अशास्त्रीयो धर्मः अतिदिश्येत तर्हि "अचः परस्मिन् पूर्वविधौ" इत्यनेन अल्लोपस्य स्थानिवद्भावे सति ऊठ् न सिध्येत्। अनादिष्टादचः पूर्वत्वे - स्थानिभूतादचः पूर्वत्वे ,

प्रकृते अल्लोपस्थानी यक्प्रत्ययाकारः, ततः पूर्वत्वे। स्थानिद्वारके- कण्डुव् इत्यस्य स्थानी कण्डू इति, तद्द्वारा।

**शेखरे- अत एव अर्थवत्सूत्रशेषे अप्रत्यय इत्यस्य पर्युदासत्वमेवोक्तं भाष्ये। तत्र पक्षे च काण्डे इत्यत्र पूर्वान्तवद्भावेन प्रत्ययान्तभिन्नत्वाद्दोषः शङ्कितो न तु स्वाश्रयाप्रत्ययान्तत्वेन।**

अत एव - अतिदिश्यमानधर्मविरुद्धस्वाश्रयकार्याभावादेव। तत्र पक्षे च - अप्रत्यय इत्यस्य पर्युदासत्वे। काण्ड औ इति स्थिते नपुंसकाच्च इति शीभावे काण्ड ई इति जाते आद्गुण इति गुणैकादेशे काण्डे इत्यत्र एकादेशस्य पूर्वान्तवद्भावेन प्रत्ययान्तभिन्नत्वात् प्रातिपदिकसंज्ञा प्राप्नोतीति दोष आशङ्कितो भाष्ये। काण्डे इत्यत्र स्वतः प्रत्ययान्तत्वभिन्नत्वे सति तदाश्रित्य प्रातिपदिकसंज्ञाप्राप्तिदोष उद्भावयितुं शक्यते, परन्तु तथा न कृतम्।

**शेखरे - क्षियो दीर्घादिति सूत्रे भाष्येपि अतिदिश्यमानधर्मविरुद्धस्वाश्रयकार्याभाव इति स्फुटम्। क्षिय इत्यत्र इयङर्थं प्रकृतिवदतिदेशे स्वाद्यनुत्पत्तिमाशङ्क्य एवं तर्हि आतिदेशिकानां स्वाश्रयाणि न निवर्तन्ते इति समाधाय अतिदिश्यमानधर्मविरुद्धस्वाश्रयनिवृत्तेरावश्यकत्वाभिप्रायेण अथाप्येतन्न इत्याशङ्क्य निर्देशसामर्थ्याद् विभक्तिरित्युक्तम्। असिद्धवत्सूत्रे च कैयटे स्फुटमेतत्।**

क्षिधातोः क्तप्रत्यये “निष्ठायामण्यदर्थे” इति सूत्रेण दीर्घे क्षी त इति स्थिते “क्षियो दीर्घात्” इति सूत्रेण नत्वे क्षीन इति जाते णत्वे क्षीण इति सिध्यति। तत्र “क्षियो दीर्घादिति” सूत्रे क्षिय इति निर्देशः कथं युज्यते इति विचारितं भाष्ये। तथाहि- क्षिधातोरनुकरणभूते क्षिशब्दे प्रकृतिवदनुकरणमिति न्यायेन धातुत्वमतिदिश्य अचि श्नुधातुभ्रुवां य्वोरियङुवङौ इति सूत्रेण इयङादेशः वक्तव्यः। यदि

धातुत्वमतिदिश्येत तर्हि अर्थवदधातुरप्रत्ययः प्रातिपदिकमित्यत्र अधातुरिति निषेधात् प्रातिपदिकत्वाभावात् विभक्तिरेव नोत्पद्येत। तत्र (आतिदेशिकानां स्वाश्रयाणि न निवर्तन्ते) इत्याश्रित्य धातुत्वातिदेशेऽपि स्वाश्रयं प्रातिपदिकत्वं न निवर्तते तथाच विभक्तिरुत्पद्यत एवेति समाधानमुक्तं भाष्ये प्रथमम्। परन्तु अनुपदमेव (आतिदेशिकानां स्वाश्रयाणि न निवर्तन्ते) इति वचनस्य (आतिदेशिकानाम् अतिदिश्यमानधर्माविरुद्धान्येव स्वाश्रयाणि न निवर्तन्ते, विरुद्धानि तु निवर्तन्त एव) इत्याशयमभिप्रेत्य क्षिय इति सूत्रकारनिर्देशादेव विभक्तिरिति समाहितम्।

**शेखरे - यत्तु गाङ्कुटादिसूत्रे भाष्ये सृजिदृशोः इत्यत्र अकितीति पर्युदासात् सिसृक्षतीत्यत्र हलन्ताच्च इति कित्वातिदेशेऽपि अमागममाशङ्क्य प्रसज्यप्रतिषेधाश्रयणेन समाहितं तत्तु वार्तिककृदुक्तमुपायान्तरं बोध्यम्।**

सृज्-धातोः (धातोः कर्मणः समानकर्तृकादिच्छायां वा) इति सूत्रेण सनि सृज् स इति स्थिते हलन्ताच्च इति सूत्रेण सनः कित्वमतिदिश्यते। अतिदिश्यमानधर्मः कित्वम्, तद्विरुद्धं स्वाश्रयम् अकित्वम्। इदानीं “सृजिदृशोर्झल्यमकिति” इति सूत्रेण विहितः अमागमः सृज् स इत्यत्र भवति वेति विचारः। अत्र स्वाश्रयमकित्वम् अतिदिश्यमानधर्मविरुद्धमिति कृत्वा तदाश्रयः अमागमो न भविष्यतीति युक्तं समाधानम्। परन्तु वार्तिककृता - “सृजिदृशोर्झल्यमकिति” इत्यत्र अकितीत्यस्य पर्युदासत्वे सनः स्वतः किद्भिन्नत्वेन, “हलन्ताच्च” इति सूत्रेण कित्वातिदेशवशात् कित्सादृश्येन च, अमागमः प्राप्नोति, तस्मादत्र प्रसज्यप्रतिषेध आश्रयणीय इत्येवम् अमागमवारणमन्यथा कृतम्। यदि अतिदिश्यमानधर्मविरुद्धस्वाश्रयकार्याभाव इति वार्तिककारसम्मतं तर्हि तेनैव उपायेन दोषोऽयं वारितः स्यात् - इत्याक्षेपः। अत्र समाधानम् - उपायस्य उपायान्तरादूषकत्वात् वार्तिकविरोधो नास्ति।

### 3.0 अनल्विधावित्यत्र विधिग्रहणप्रयोजनम्

शेखरे - अनल्विधाविति विधिग्रहणादलाश्रये विधावित्यर्थात् यत्र विधौ शब्दतः स्थानि-स्थान्यवयवान्यतराल्वृत्तिधर्मवतः तेन तस्मात् तस्य तस्मिन् तदादेरित्यादिप्रकारेण विशेष्यतया विशेषणतया वा अल आश्रयणं तत्र निषेधः। व्यूढोरस्केन, द्यौः, द्युभ्याम्, क इष्टः, प्रपठ्य - इत्युदाहरणानि।

अनल्विधावित्यत्र विधिग्रहणप्रयोजनं विव्रियते। अल्विधौ न इत्यर्थः। अल्विधिरित्यत्र मध्यमपदलोपी समासः। अलाश्रयः विधिरनल्विधिः। यत्र विधौ अल् शब्दतः आश्रीयते तत्र स्थानिवद्भावो न। स च अल् क्वचित् स्थानी एव, क्वचिच्च स्थान्यवयवः। अल् आश्रीयते इत्युक्ते अल्वृत्तिधर्मः आश्रीयते इत्यर्थः। बहुधा च अलम् आश्रित्य विधयो भवन्ति। तथाहि - अट्कुप्वाङ्नुम्भिः व्यवायेऽपि इत्येवम् अला विधिः। व्यूढम् उरः यस्य स इत्यर्थे बहुव्रीहौ "उरःप्रभृतिभ्यः कप्" इति समासान्ते कपि व्यूढ सु उरस् सु क। "सुपो धातुप्रातिपदिकयोरि"ति सुब्लुकि गुणे व्यूढोरस् क इति जाते रुत्वे विसर्गे च व्यूढोरः क। "सोपदादौ" इति सूत्रेण विसर्गस्य सकारे व्यूढोरस्क। ततः तृतीयैकवचने "टाङसिङसामिनात्स्या" इति इनादेशे व्यूढोरस्केन। अत्र रेफनकारयोः मध्ये विसर्गस्थानिकस्य सकारस्य स्थानिवद्भावे विसर्गस्य अट्त्वात् "अट्कुप्वाङ्नुम् व्यवायेऽपि" इति णत्वं प्राप्नोति। अनल्विधाविति निषेधात् न दोषः। "हल्ङ्याब्भ्यो दीर्घात् सुतिस्यपृक्तं हल्" इत्येवम् अलः परस्य विधः। वकारान्तात् दिव् शब्दात् सुप्रत्यये "दिव औत्" इति सूत्रेण वकारस्य औकारादेशे दिऔसु इति स्थिते यणादेशे द्यौ सु। अत्र औकारादेशस्य स्थानिवद्भावेन वकारत्वे हलन्तात् परस्य सोः "हल्ङ्याब्भ्य" इत्यनेन लोपः प्राप्नोति। अनल्विधाविति निषेधात् स्थानिवद्भावाभावे द्यौः इति सिध्यति।

अलः स्थाने विधौ स्थानिवद्भावनिषेधस्योदाहरणं द्युभ्यामिति। दिव् शब्दात् भ्यामि "दिव उत्" इत्यनेन वकारस्य उकारादेशे तस्य स्थानिवद्भावेन वकारत्वे लोपो व्योरित्यनेन लोपः प्राप्नोति।

अलि परे विधौ स्थानिवद्भावनिषेधस्य क इष्ट इत्युदाहरणम्। किम् सु यज् क्त इति स्थिते "किमः कः" इति सूत्रेण कादेशे क सु यज् क्त। "वचिस्वपियजादीनां किति" इत्यनेन यजः सम्प्रसारणे क स् इज् त। सकारस्य रुत्वे, जकारस्य षत्वे तकारस्य ष्टुत्वे क रु इष्ट इति जाते "भोभगोअघोअपूर्वस्य योऽशि" इत्यनेन यत्वे लोपः शाकल्यस्येति विकल्पेन यलोपे क इष्ट इति सिध्यति। अत्र सम्प्रसारणस्य स्थानिवद्भावेन यकारत्वे रोः हशि च इत्युत्वं प्राप्नोति। अलि परे विधौ कर्तव्ये स्थानिवद्भावनिषेधात् न दोषः।

अलादेः विधौ स्थानिवद्भावनिषेधस्य प्रपठ्य इत्युदाहरणम्। प्रपठ् ल्यप् इति स्थिते स्थानिवद्भावेन क्त्वाप्रत्ययत्वेन "आर्धधातुकस्येड्वलादेः" इति इडागमे प्राप्ते अलादेः विधौ स्थानिवद्भावनिषेधात् इडागमो नास्ति।

**शेखरे - शब्दत इत्युक्तेः अग्रहीदित्यादौ इट ईटि इति सिध्यति। दीर्घविधावत्र च इट इति समुदायाश्रयणात्। अन्यथा टस्यानुबन्धत्वात् इकारस्यैवोभयत्राश्रयणमिति अल्विधित्वं स्यात्।**

ग्रहधातोः लुङि, "च्लि लुङि" इति सूत्रेण च्लौ, "च्लेः सिच्" इति सिचि, तिपि, इतश्च इति तिप इकारलोपे, "अस्तिसिचोपृक्ते" इति ईडागमे, आर्धधातुकस्येड्वलादेः इति सिच इडागमे, लुङ्लङ्लृङ्क्ष्वडुदात्त इत्यनेन धातोरडागमे, ग्रहोलिटि दीर्घ इति सूत्रेण इट् यः अच् तस्य दीर्घे च (अ ग्रह् ई स् ई त्) इति। इदानीम् स्थानिनि इकारे विद्यमान इट्त्वरूपो विशेषधर्म ईकारे अतिदिश्यते। अनल्विधाविति निषेधोऽत्र

न प्रवर्तते, इट ईटि इत्यत्र शब्दतः अल आश्रयणाभावेन अल्विधित्वाभावात्। इट् इति समुदायः आश्रीयते। ततश्च इट ईटि इति सूत्रेण सकारलोपे अग्रह् ई ई त्। सवर्णदीर्घे अग्रहीत्।

4.0 सामान्यातिदेशे विशेषानतिदेशः

**शेखरे - अत्र सूत्रे विशेषातिदेशोऽपि। अन्यथा इडादेरपि क्त्वः सत्वात् वलादित्वस्य तद्विशेषधर्मत्वात् उपस्थितधर्मैः तद्व्यापकधर्मैश्च विध्याकाङ्क्षापूरणे सति तदतिरिक्तविशेषणग्रहणे मानाभाव इत्येतन्न्यायमूलकेन सामान्यातिदेशे विशेषानतिदेशेन सिद्धौ विशेषणतया अलाश्रयणे निषेधः इत्येत्प्रतिपादकस्य अनल् इत्येव सिद्धे कृतस्य विधिग्रहणस्य वैयर्थ्यं स्यात्। हलादिक्ङिन्निमित्तकेत्त्व-प्रतिषेधकात् न ल्यपीति लिङ्गाच्च।**

अग्रह् ई स् ईत् इत्यत्र ईकारे स्थानिनिष्ठम् इट्त्वरूपं विशेषधर्ममतिदिश्य “इट ईटि” इति सूत्रं प्रवर्त्येत इत्युक्तम्। तच्च “सामान्यातिदेशे विशेषानतिदेश” इति लोकन्यायविरुद्धम्। ग्रहोऽलिटि दीर्घ इत्यस्य ग्रहः परस्य इटः अचः दीर्घः स्याद् अलिटि इत्यर्थः। तथाच दीर्घस्य अच् स्थानी। दीर्घादेशस्य स्थानिनि अचि इट्त्वं विशेषधर्मः - इति शङ्कायाम् अनल्विधावित्यत्र विधिग्रहणेन विशेषातिदेशोऽस्तीति प्रदर्श्यते - अत्र सूत्रे इत्यादिना। तथाहि अनल् इत्येव उच्यताम्। विधिग्रहणं मास्तु। अनल् इत्यस्य च प्रातिपदिकनिर्देशत्वात् (अला अलः अलः अलि च) कार्ये कर्तव्ये स्थानिवद्भावो नास्तीत्यर्थः। तदेतत् सूत्रे विधिग्रहणं विनापि सिध्यति।

प्रदिव् ल्यप् इति स्थिते ल्यबादेशे स्थानिवद्भावेन क्त्वाप्रत्ययवद्भावे इडागमः प्राप्तः। तत्र क्त्वाप्रत्ययनिष्ठाः बहवो धर्माः - इकारादित्व-वलादित्व-प्रत्ययत्व-आर्धधातुकत्वादयः। तेषु ये सामान्यधर्माः ते अतिदिश्यन्ते आदेशे। विशेषधर्मास्तु

नातिदिश्यन्ते (सामान्यातिदेशे विशेषानतिदेशः) इति लोकन्यायात्। लोके - ब्राह्मणवदस्मिन् क्षत्रिये भवितव्यमित्युक्ते ब्राह्मणत्वेन यो व्यवहारः स तस्मिन् भविष्यति, न तु माठरे कौण्डिन्ये वा यो विशेषेण व्यवहारः स न भविष्यति। शास्त्रेऽपि आदेशः स्थानिवत् स्यादिति विधेः चारितार्थ्यं स्थानिनिष्ठानाम् उपस्थितधर्माणां, तद्व्यापकधर्माणाञ्च अतिदेशेनैव लब्धम्। उपस्थितधर्माः - उपात्ते शब्दे उपस्थिता धर्माः। यथा वलादेरार्धधातुकस्येत्युक्ते आर्धधातुकत्वम् उपस्थितधर्मः। तद्व्यापकधर्माः - प्रत्ययत्वकृत्त्वांदयः। विशेषधर्माः - क्त्वाप्रत्ययो बहुविधः, क्वचित् वलादिः, क्वचित् इकारादिः, क्वचिद् ईकारान्तः - अतः वलादित्वादयः विशेषधर्माः। सर्वेषु क्त्वाप्रत्ययेषु प्रत्ययत्वादयो विद्यन्त इति ते सामान्यधर्माः। क्त्वाप्रत्ययनिष्ठस्य वलादित्वरूपविशेषधर्मस्य अनतिदेशादेव प्रदिव् ल्यप् इत्यादौ इडागमो न भविष्यति।

एवञ्च सूत्रे विधिग्रहणं व्यर्थमिति प्राप्तम्। तत्रोच्यते - न व्यर्थम्। स्थानिवत्सूत्रेण विशेषधर्मा अप्यतिदिश्यन्ते इति अनेनैव ज्ञायते। तथासति, विधिग्रहणाभावे अनल् इत्युच्यमाने प्रधानतया अलं गृहीत्वा कृते विधावेव निषेधः सिध्येत्, विशेषणतया अलं गृहीत्वा कृते आर्धधातुकस्येड्वलादेरित्यादौ विधावपि स्थानिवद्भाव इष्यते। विधिग्रहणे कृते तु सर्वविधेषु विधिषु निषेधः सिध्यति। विशेष्यतया वा विशेषणतया वा शब्दतः अलमाश्रित्य क्रियमाणेषु सर्वेषु विधिषु।

Pathshala पाठशाला A Gateway to all Post Graduate Courses